महाघना: क्षीणपुरीषमूत्र-
विस्तीर्णकर्णास्तनुरोमगण्डाः ।
ते सार्व्वभौमाभिजनप्रसूता
विग्रहसुता: प्रभवन्ति येषु ॥ ७ ॥
ये दीर्घमुष्का: सुविभक्तदेहा
महाजवा: क्रोधपरीतकाय ।
विस्तीर्णकर्णास्तनुपुच्छदन्ताः
उदामनवैव बमाप्रियाय ॥
महागण्डास्तनुलोमयुक्ता: ।
ते सुप्रतीकप्रवरप्रसूता: ।
महाप्रमाणामितमौक्तिकानि
भवन्ति येतभिजगाद काप्य: ॥८॥ *॥

एकजातिसमुत्पन्नो गज: शुद्ध इति स्मृत: ।
लक्षणञ्च यथा प्रोक्तं शुद्धेतन दृश्यते ॥
शुद्धद्विजातिसम्भूतलक्षणसमन्वित: ।
जारजो नाम विख्यातो यथार्थं बलवीर्य्यवान् ॥
द्विजातिप्रजातो य: स शुद्ध इति कथ्यते ।
द्विजातिजारजोत्पन्न सङ्कीर्ण इति कथ्यते ॥
एवं संयोगभेदेन गजजातिरनेकधा ।
तां यो जानाति तत्त्वेन स राज्ञ: पात्रमर्हति ॥
ब्रह्मादिजातिभेदेन तेषां भेदश्चतुर्व्विध: ।
विप्रा: शान्ता: पवित्राश्च ब्राह्मणा: स्वल्पभो-
जिन: ॥
शूरा विशाला बलाढ्या: क्रुद्धा: क्षत्त्रिय-
जातय: ॥ * ॥

अथ गुणा: ।
"यथा रत्नं यथा वाजी यथा स्त्री ससयो यथा ।
परीक्ष्यन्ते गुणैरेवं गजानामपि निर्णय: ॥
रम्यो भीमो ध्वजोऽधीरो वीर: शूरोऽष्ट-
मङ्गल: ।
सुनन्द: सर्व्वतोभद्र: स्थिरो गम्भीरवेध्यपि ।
वरारोह इति प्रोक्ता गजा द्वादश सत्तमा: ॥"
तद्यथाह भोज: ।
"विभक्तावयव: पुष्ट: सुदन्त: सुमहानपि ।
तेजस्वी रम्य इत्युक्तो गज: सम्पत्तिवर्द्धन: ॥ १ ॥
चतुर्याद्विपवारेण यस्य भीतिर्न जायते ।
स भीमोऽयं गज: श्रेष्ठो राज्ञ: सर्व्वार्थसाधन: ॥२॥
पुच्छाग्रात् पुच्छपर्य्यन्त रेखा यस्यैव दृश्यते ।
ध्वज: एष गजो नाम साम्राज्यप्रापदा-
यक: ॥ ३ ॥
वक्षौ कुम्भौ उदाकारौ आवर्त्तौ तत्र चोच्छ्रयौ ।
अधीरोऽयं गजो नाम्ना राज्ञो विघ्नविना-
शन: ॥ ४ ॥
आवर्त्त: पृष्ठतो यस्य शत्रूनभिमभिविन्दति ।
पुष्टाङ्गो बलवान् वीरो राज्ञामभिमतप्रद: ॥५॥
महाप्रमाण: पुष्टाङ्ग: सुदन्तश्चारुगण्डक: ।
भवति भवति श्रान्त: शूरो लक्ष्मीविवर्द्धन: ॥६॥
सितौ दन्तौ सित: पुच्छ: सिता रेखा: सिता
नखा: ।
रक्तकुम्भाश्रितोच्चाङ्गैर्विज्ञेय: सोऽष्टमङ्गल: ॥
एवं गजेन्द्रो यस्यास्ते तस्य स्यात् सकला मही ।
नारिष्टानीतयश्चात्र यथास्तत्त्वऽयं गजेश्वर: ॥
आयोजनगतं यावदनर्थं कुरुते क्षयम् ।
नाल्पपुण्यैरयं प्राप्यो मनुजेन्द्रै: कलौ युगे ॥८॥
शुभौ दन्तौ शुभ: शुण्ड: शुभौ कुम्भौ शुभस्तनु: ।
गण्डयोर्गण्डयोर्मध्ये आवर्त्त: शुभलक्षण: ॥
मत्तश्चाद्गतिपरिप्लुतगण्डदेशा-
स्तीक्ष्णाङ्कुशेन विनिवारयितुं न शक्या: ।
ख्यातिद्विपो नवपयोदरवा गभीरा:
पृथ्वीभुजां सकलसौख्यकरा भवन्ति ॥*"॥

अथ दोषा: ।
"दीन: क्षीणोऽथ विषमो विरूपो विकल:
खर: ।
विमदो भापक: काको धूम्रो जटिल इत्यपि ॥
पञ्जिनो मण्डलो भित्रो हताधर्मो महाभय: ।
राष्ट्रहा सुपक्षो भाषी नि:सत्त्व इति धीमति: ।
महादोषा: समाख्याता गजानां भोजभूभुजा ॥"
तद्यथा,—
"अतिक्षीणतर: क्षीणतनुदन्तोऽतिनिष्प्रभ: ।
दीनाख्य: कुरुते दीनं भूभुजं नात्र संशय: ॥ १ ॥
सर्व्वशुष्को महापुच्छो निश्वासी वेगवर्ज्जित: ।
क्षीणोऽयं कुरुते क्षीणं स्वामिनं धनसम्पदा ॥ २
कुम्भे दन्तेऽक्षिकर्णे च वैषम्यं पार्श्वयोस्तथा ।
यस्यायं विषमो नागो नागवत् कुरुते क्षयम् ॥३॥
आस्कन्धात्तु शिर: क्षीणं पश्चाद्भागस्य पुष्टता ।
विरूप इति नागोऽयं कुरुते भूधनक्षयम् ॥ ४ ॥
नानाभोगैरपि भक्ष्यैर्यस्य नो जायते मद: ।
युद्धाय नोपक्रमति विकलं तं विवर्ज्जयेत् ॥ ५ ॥
खरता सहजा यस्य शरीरेऽस्तीति लक्ष्यते ।
तनुदन्तकरो हस्ती खर: कुलविनाशन: ॥ ६ ॥
न जायते मदो यस्य कदाचित् जायतेऽथवा ।
विरूपो विषमो वापि विमदं दूरतस्त्यजेत् ॥७॥
लघुप्रमाण: क्षीणाङ्गस्तनुपुच्छशिरोदर: ।
पश्चान्ते स्खलति व्यग्र: पतेद्वै निम्नयोर्गतम् ॥
शिरे पुच्छापतौ वापि चावर्त्तौ मण्डलोऽथवा ।
बधि: प्रकुरुते शिघ्रं सर्व्वथा गतवैभवम् ॥
भूभुजा नहि वीक्ष्योऽयं भापकाख्यो गजाधम:
यदीच्छेद्बाह्यतीं भूतिं शरीरारोग्यमेव वा ॥८॥
मध्यदेशो यस्य भग्नो स्कन्धदेशोऽतिगुच्छक: ।
काकोऽयं कुरुते मृत्युं स्वामिनो नात्र संशय: ॥९॥
विपरीतौ मध्यगौ दन्तौ यस्य मध्यविरोधिनौ ।
मिथोरेव वा विरोर्ध्वता सर्थं मूल्याम्बराशुभौ ।
कुरुते व्याधितं नाथं धूम्रनामा गजाधम: ॥१०॥
मूर्द्धजा: कर्कशा रूक्षा जटारूपाश्च बन्धिन: ।
यस्यायं जटिलो नाग: कुरुते धनसंक्षयम् ॥११॥
स्कन्धे वा गात्रदेशे वा लग्नं पक्ष्मोऽवलम्बते ।
पञ्जिनो नाम नागोऽयं कुरुते भूधनक्षयम् ।
नैनं स्वप्नेऽपि वीक्षेत यदीच्छेदात्मन: श्रियम् ॥१२॥
मण्डलानि प्रदृश्यन्ते एकं द्वे वा त्रयाणि वा ।
विरूपाण्युन्नतानीव मण्डलो कुलनाशन: ॥१३॥
तानि श्वेतानि यस्य स्यु: भित्री स धननाशन:॥१४
हृदये उदरे चैव लिङ्गे पुच्छाग्र मूलत: ।
गुदे मेढ्रे पदे चैव आवर्त्तेन धनक्षयम् ।
योऽनिर्न कुरुते भूपं मतादिनाशयुपद्रुतम् ॥ १५ ॥
गच्छतो यस्य गुल्फाभ्यां भवेत् संघर्षणं
मुहु: ।
अपि सर्व्वगुणैर्युक्तस्त्याज्यश्च स महाभय: ॥
राष्ट्रं धनं कुलं सैन्यं मेघं दारान् तथा प्रजा: ॥
अपचत्यशुभो नागो दुष्टमात्रो न संशय: ॥
तस्मादपक्रियते लोकस्तत्र वन्यभयं भवेत् ।
व्याधिवह्निभयं चात्र यत्रास्ते स महाभय: ॥१६॥
भृशं सन्ताप्यमानस्तु पादैकं यो न गच्छति ।
पृष्ठोदरं समाहृत्य रेखा रक्तसमा यदि ॥
न्यस्तापिमपदस्थाने पश्चात् पात: पदे यदि ।
अपि सर्व्वगुणैर्युक्तो राष्ट्रहायं गजाधम: ॥
राष्ट्रादपाक्रियतेऽयं भूभुजा श्रियमिच्छता ।
राष्ट्रान्ते रक्षितो मोहात् कुरुते राष्ट्रसंक्ष-
यम् ॥ १७ ॥
पादाश्चात्यन्तविषमा दन्तौ चान्योन्यवैषमौ ।
पक्षरो दृश्यते भग्न एको वाष्टौ द्वयोऽथवा ॥
दन्तौ वा पतितौ यस्य किम्बा वा न प्ररोहत: ॥
कुम्भौ वा विपदौ यस्य सुपक्षोऽसौ गजाधम: ।
राष्ट्रदुर्गबलामात्यक्षयदस्तं परित्यजेत् ॥ १८ ॥
धर्म्मगाञ्च इवाभाति भाले यस्यातिकर्कश: ।
भाषी स कुरुते नागो भर्त्तु: कुलधनक्षयम् ॥१९॥
पुष्टो विशाल: सदन्त: सत्कारोऽपि शुभोऽपि
सन् ।
न रणे साहसी यस्य स नि:सत्त्वो गजाधम: ॥
सर्व्वेषां गजदोषाणामुक्त एव महानयम् ।
येनैकेन गुणा: सर्व्वे क्षपायन्ते सुनिश्चितम् ॥"२०
पालकाप्यस्तु ।
"क्षीणदन्ताङ्गशुण्डत्वं विषमत्वं रदादिषु ।
शिर: क्षीणमध: पुष्टिरेते दोषा गजे मता: ॥"*
गार्ग्यस्तु ।
"ये कुञ्जरास्तनुरदास्तनुगण्डशुण्डा:
क्षीणा: सुदीनवपुषो गुरुदीर्घपुच्छा: ।
यत्नादिभि: खलु गुणैरहिता विनाय
ते भूभुजामभिमता नहि वीक्षणीया: ॥
यो न स्रवेन्मदजलं तनुमूर्द्धभागो
निर्व्वीर्य्यतामुपगतो बहुभोजनेऽपि ।
नैष्कृत्यतामुपगतानपराविशन्तु
भूमीभुजा न हि गजोऽयमवेक्षणीय: ॥
दोषैर्युतान् गजान् राजा न वीक्षेत कदाचन ।
न्यसेद्वा परराष्ट्रेषु नगरात् क्षिपते बहि: ॥
दद्यात् द्विजेभ्य: शुद्रेभ्यो गणकायाथवा नृप: ।
दृष्ट्वा यदि गजान् दुष्टान् दद्यात्तु शान्तिकं विभे ।
पुरं नीराजयेद्वापि चात्मानं वाथवा सुतम् ।
दैवज्ञेन स्तुतिपादयुतं यातितत्पर: ॥
तिलान् वा जुहुयाद्दन्ती तत्प्रतीकारहेतवे ।
ब्रह्मादिजातिभेदेन जातिदन्ता चतुर्व्विधा ॥
चतुर्व्विधानां भूपानां चाहमे ते शुभप्रदा: ।
ये दोषा दोषवन्तानां त एव स्यु: सजातित: ॥
ये व्याधयो नराणां स्युस्ते गजानामपि स्मृता: ।
चिकित्सापि तथा तेषां भाषा चैव गरीयसी ॥"
इति गजपरीक्षा ॥
इति भोजराजकृतयुक्तिकल्पतरु: ॥